# Sarvekrita Shri Ganesha Stuti

# સર્વેકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Sarvekrita Shri Ganesha Stuti 2

File name : gaNeshastutiHsarvekRRitA2.itx

Category : ganesha, gaNeshapurANa, stuti

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM krIDA (uttara)khaNDaH | adhyAyaH 78 | 2.78 23-36||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# સર્વેકૃતા શ્રીગણેશસ્તુતિઃ

સર્વે ઊચુઃ ।
દીનનાથ ! દયાસિન્ધો ! યોગિહૃત્પદ્મસંસ્થિત ! ।
અનાદિમધ્યરહિતસ્વરૂપાય નમો નમઃ ॥ ૨૩॥

જગદ્ભાસ ! ચિદાભાસ ! જ્ઞાનગમ્ય ! નમો નમઃ ।
મુનિમાનસવિષ્ટાય નમો દૈત્યવિઘાતિને ॥ ૨૪॥

ત્રિલોકેશ ! ગુણાતીત ! ગુણક્ષોભ ! નમો નમઃ ।
ત્રૈલોક્યપાલન ! વિભો ! વિશ્વવ્યાપિન્ ! નમો નમઃ ॥ ૨૫॥

માયાતીતાય ભક્તાનાં કામપૂરાય તે નમઃ ।
સોમસૂર્યાગ્નિનેત્રાય નમો વિશ્વમ્ભરાય તે ॥ ૨૬॥

અમેયશક્તયે તુભ્યં નમસ્તે ચન્દ્રમૌલયે ।
ચન્દ્રગૌરાય શુદ્ધાય શુદ્ધજ્ઞાનકૃતે નમઃ ॥ ૨૭॥

ફલશ્રુતિઃ -
ક ઉવાચ ।
એવં સ્તુવત્સુ દેવેષુ તેજોરાશિરભૂત્ પુરઃ ।
સર્વે હતદૃશો દેવા વિસ્મિતા અભવઁસ્તદા ॥ ૨૮॥

તતસ્તત્કૃપયા દેવઃ સૌમ્યતેજા અજાયત ।
તતસ્તે દદૃશુર્દેવં સિંહારૂઢં વિનાયકમ્ ॥ ૨૯॥

દશાયુધધરં તાવદ્ભુજં દિવ્યકિરીટિનમ્ ।
નાનાભૂષાભિરામં ચમુક્તાદામવિભૂષિતમ્ ॥ ૩૦॥

દિવ્યગન્ધાનુલેપાઢ્યં વ્યાલબદ્ધોદરં વિભુમ્ ।
ક્ષુદ્રઘણ્ટાક્વણત્પાદં કસ્તૂરીતિલકોજ્જ્વલમ્ ॥ ૩૧॥

એવં દૃષ્ટ્વા સુરા દેવં નમસ્કૃત્યોચિરે તદા ॥

યશ્ચિન્તિતો ગુરોર્વાક્યાત્ સ એવાયં વિનાયકઃ ॥ ૩૨॥

સ એવ દૃષ્ટઃ સાક્ષાત્ તુ વાઙ્મનોઽગોચરો વિભુઃ ।
જન્મ ધન્યં દૃશિર્ધન્યા તપો દાનં ચનઃ સુરાઃ ॥ ૩૩॥

તત ઊચે સુરાન્ દેવસ્તુષ્ટોઽહં ભવતાં સ્તવૈઃ ॥

પૂજયા ચૈવ ભક્ત્યા ચ સઙ્કષ્ટીવ્રતતોઽપિ ચ ॥ ૩૪॥

સઙ્કષ્ટહરમેતચ્ચ સ્તોત્રં ખ્યાતં ભવિષ્યતિ ।
યઃ પઠેત્ પ્રયતો નિત્યં સ મે માન્યો ભવેત્ સુરાઃ ॥ ૩૫॥

તસ્ય દર્શનતઃ સર્વે નશ્યેયુર્યક્ષરાક્ષસાઃ ।
ભોગાન્ ભુનક્તિ વિવિધાનન્તે મોક્ષપદં લભેત્ ॥ ૩૬॥

ઇતિ સર્વેકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીગણેશપુરાણં ક્રીડા (ઉત્તર)ખણ્ડઃ । અધ્યાયઃ ૭૮ । ૨.૭૮ ૨૩-૩૬॥

- .. shrIgaNeshapurANaM krIDA (uttara)khaNDaH . adhyAyaH 78 . 2.78 23-36..

Proofread by Preeti Bhandare

---

*Sarvekrita Shri Ganesha Stuti*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*